कृतोपवासः शुचिरप्रमत्तः
संपूजयेद्भक्तिनम्रो गणेशम् ॥"
इति प्रायश्चित्ततत्त्वम् ॥

संयत्वरः, पुं, वाग्यतः । जन्तुसमूहः । इति संक्षिप्तसारोणादिवृत्तिः ॥

संयद्वरः, पुं, (संयच्छतीति । सं+यम+क्विरच्छत्वरेति । उणा० ३ । १ । इति ष्वरच्प्रत्ययेन साधु ।) नृपः । इत्युणादिकोषः ॥

संयन्ता, [ऋ] त्रि संयमनकर्त्ता । नियन्ता । संपूर्व्वयमधातोस्तृन्प्रत्ययेन निष्पन्नः ॥ (यथा, महाभारते । ४ । ६२ । ४८ ।
"तं विसंज्ञमपोवाह संयन्ता रथवाजिनाम् ।
उपदेशमनुस्मृत्य रक्षमाणो महारथम् ॥")

संयमः,पुं, (सं+यम+"यमः समुपनिविषु च।" ३ ।३ । ६३ । इति अप् ।) व्रताद्यङ्गपूर्व्वदिनकर्त्तव्याचारः । तत्पर्य्यायः । वियामः २ नियमः ३ यामः ४ यमः ५ संयामः ६ । इत्यमरः ॥ संयमनम् ७ नियमः ८ इति धरणिः ॥ तद्विधानं यथा । अथ दशमीनियमाः । सूरिमन्तोषे ।
"कांस्यं मांसं मसूरञ्च चणकं कोरदूषकम् ।
शाकं मधु परान्नञ्च त्यजेदुपवसन् स्त्रियम् ॥"
अत्रोपवसन्निति तद्दिने भोजनासम्भवात् सामीप्यात् पूर्व्वापरदिनयोर्ग्रहणम् । स्मृतिः ।
"शाकं माषं मसूरञ्च पुनर्भोजनमैथुने ।
द्युतमत्यम्बुपानञ्च दशम्यां वैष्णवस्त्यजेत् ॥
कांस्यं मांसं सुरां क्षौद्रं लोभं वितथभाषणम् ।
व्यायामञ्च व्यवायञ्च दिवास्वप्नं तथाञ्जनम् ॥
तिलपिष्टं मसूरञ्च दशम्यां वर्ज्जयेत् पुमान् ।
दशम्यामेकभक्तञ्च कुर्व्वीत नियतेन्द्रियः ॥
आचम्य दन्तकाष्ठञ्च खादेत तदनन्तरम् ।
पूर्व्वं हरिदिनाल्लोकाः सेवध्वं चैकभोजनम् ॥
अवनीपृष्ठशयनाः स्त्रियाः सङ्गविवर्जिताः ।
सेवध्वं देवदेवेशं पुराणं पुरुषोत्तमम् ।
सकृद्भोजनसंयुक्ता द्वादश्याञ्च भविष्यथ ॥"
इत्येकादशीतत्त्वम् ॥*॥
श्राद्धपूर्व्वदिनकर्त्तव्यनियमो यथा । देवलः ।
"श्वः कर्त्तास्मीति निश्चित्य दाता विप्रान्निमन्त्रयेत् ।
निरामिषं सकृत् भुक्त्वा सर्व्वमुप्तजने गृहे ।
असम्भवे परेद्युर्व्वा ब्राह्मणांस्तान्निमन्त्रयेत् ॥"
वराहपुराणम् ।
"वस्त्रशौचादि कर्त्तव्यं श्वः कर्त्तास्मीति जानता ।
स्नानोपलेपनञ्चैव कृत्वा विप्रान्निमन्त्रयेत् ।
दन्तकाष्ठञ्च विसृजेत् ब्रह्मचारी शुचिर्भवेत् ॥"
विसृजेत् श्राद्धीयब्राह्मणेभ्यो दद्यात् । मार्कण्डेयपुराणम् ।
"निमन्त्रयेच्च पूर्व्वेद्युः पूर्व्वोक्तान् द्विजसत्तमान् ।
अप्राप्तौ तद्दिने वापि हित्वा योषित्प्रसङ्गिनम् ॥"
यमः ।
"प्रार्थयेत् प्रदोषान्ते भुक्तान् शयितान् द्विजान् ।
सर्व्वायासविनिर्मुक्तैः कामक्रोधविवर्ज्जितैः ॥
भवितव्यं भवद्भिश्च श्वोभूते श्राद्धकर्म्मणि ।
दक्षिणं जानु चालभ्य त्वं मयात्र निमन्त्रितः ।
एवं निमन्त्र्य नियमान् श्रावयेत् पैतृकान् बुधः ॥"
तन्नियममाह ।
"अक्रोधनैः शौचपरैः सततं ब्रह्मचारिभिः ।
भवितव्यं भवद्भिश्च मया च श्राद्धकर्म्मणि ॥"
इति श्राद्धतत्त्वम् ॥*॥
तीर्थयात्रापूर्व्वदिनकर्त्तव्यनियममाह । ब्रह्मपुराणम् ।
"यो यः कश्चित्तीर्थयात्रान्तु गच्छेत्
सुसंयतः स च पूर्व्वं गृहे स्वे ।
कृतोपवासः शुचिरप्रमत्तः
संपूजयेद्भक्तिनम्रो गणेशम् ॥
देवान् पितॄन् ब्राह्मणांश्चैव साधून्
धीमान् प्रीणयन् वित्तशक्त्या प्रयत्नात् ।
प्रत्यागतश्चापि पुनस्तथैव
देवान् पितॄन् ब्राह्मणान् पूजयेच्च ॥"
एवं प्रकुर्व्वतस्तस्य तीर्थाद्यदुक्तं फलं तत् स्यान्नात्र सन्देह एव । सुसंयतः पूर्व्वदिने कृतैकभक्तादिनियमस्तदुत्तरदिने कृतोपवास इत्यादि । उपवासदिने मुण्डनमपि ।
"प्रयागे तीर्थयात्रायां पितृमातृवियोगतः ।
कचानां वपनं कार्य्यं वृथा न विकचो भवेत् ॥"
इति विष्णुपुराणात् । इति प्रायश्चित्ततत्त्वम् ॥
प्रायश्चित्तपूर्व्वाह्णकृत्यं यथा । शङ्खलिखितौ ।
"वाप्य केशनखान् पूर्व्वं घृतं प्राश्य वह्निर्निशि
प्रत्येकं नियतं कालमात्मनो व्रतमादिशेत् ॥"
इति प्रायश्चित्ततत्त्वम् ॥
( बन्धनम् । यथा, साहित्यदर्पणे । ३ । १५५ ।
"क्वापि कुन्तलसंव्यानसंयमव्यपदेशतः ।
बाहुमूलं स्तनौ नाभिपङ्कजं दर्शयेत् स्फुटम् ॥"
संकोचः । यथा, मार्कण्डेये । ७७ । ४ ।
"मयि दृष्टे सदा यस्मात् कुरुषे नेत्रसंयमम् ।
तस्माज्जनिष्यते मूढे प्रजासंयमनं यमम् ॥")

संयमकः,त्रि, (संयच्छतीति । सं+यम्+ण्वुल् । नियन्ता । यथा,—
"स एव धाता सर्व्वस्य तन्नियोगकरा वयम् ।
यमसंयमने व्यक्तः सोऽस्मत्संयमको हरिः ॥"
इति वह्निपुराणे नारसिंहप्रादुर्भावाध्यायः ॥
संयमी च ॥

संयमनं, क्ली, ( सं+यम+ल्युट् । ) बन्धनम् । ( यथा, साहित्यदर्पणे । ६ । ३१८ ।
"यथावा वेण्यां द्रौपदीकेशसंयमनहेतुर्भीमसेनक्रोधापचितौ युधिष्ठिरोत्साहः ॥") व्रतम् । इति मेदिनी ॥ चतुःशालम् । इति सञ्ज्ञवनशब्दटीकायां भरतः ॥ ( यमगृहम् । यथा, महाभारते । ३ । १६३ । ८ ।
"एतत् संयमनं पुण्यमतीवाद्भुतदर्शनम् ।
प्रेतराजस्य भवनमृद्ध्या परमया युतम् ॥"
शासनम् । दमनम् । यथा, भागवते । १० । १६ । ६ ।
"तं चण्डवेगविषवीर्य्यमवेक्ष्य तेन ।
दुष्टां नदीञ्च खलसंयमनावतारः ॥"*॥
संयच्छतीति । सं+यम+ल्युः । नियन्तरि, त्रि । यथा, मार्कण्डेये । ७७ । ४ ।
"तस्माज्जनिष्यते मूढे प्रजासंयमनं यम ॥") .

संयमनी, स्त्री, (संयम्यतेऽस्यामिति । सं+यम्+अधिकरणे ल्युट् ।) यमपुरी । इति मेदिनी ॥ (यथा, भागवते । १० । ४५ । ४२ ।
"ततः संयमनीं नाम यमस्य दयितां पुरीम् ।
गत्वा जनार्द्दनः शङ्खं प्रदध्मौ सहलायुधः ॥")

संयमितः, त्रि, जातसंयमः । संयमशब्दात् इतोऽस्य जाते इत्यनेन इतप्रत्ययेन निष्पन्नः ॥

संयमी, [न्] पुं, (संयमोऽस्यास्तीति । संयम+इनिः । ) मुनिः । इति धरणिः ॥ निगृहीतेन्द्रिये, त्रि । यथा,—
"या निशा सर्व्वभूतानां तस्यां जागर्त्ति संयमी ।
यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः ॥"
इति श्रीभगवद्गीतायाम् २ अध्यायः ॥

संयात्रा, स्त्री, द्वीपान्तरगमनम् । संपूर्व्वो यातिर्द्वीपान्तरगमनवृत्तिस्ततस्त्रासुसिति त्रः स्त्रियामाप् संयात्रा । द्वीपान्तरगमनं सम्यग्यात्रा संयात्रा वा । इति सांयात्रिकशब्दटीकायां भरतः ॥

संयानं,क्ली, सम्यग्गमनम् । संपूर्व्वयाधातोरनट् (ल्युट्) प्रत्ययेन निष्पन्नम् ॥ ( यथा, महाभारते । ३ । १९ । ५ ।
"स त्वं सात्वतमुख्याद्य लब्धसंज्ञो यदृच्छया ।
पश्य मे हयसंयाने शिक्षां केशवनन्दन ! ॥"
प्रेतनिर्हारः । यथा, रामायणे । १ ।७६ । २ ।
"अलं शोकेन भद्रं ते राजपुत्त्र महायशः ।
प्राप्तकालं नरपतेः कुरु संयानमुत्तमम् ॥")

संयामः,पुं,(सं+यम+"यमः समुपनिविषु च ।" ३ । ३ । ६३ । इति पक्षे घञ् ।) संयमः । इत्यमरः ॥

संयावः पुं, (सं+यु+"समि युद्रुदुवः ।" ३ ।३। २३ । इति घञ् ।) घृतक्षीरादिपक्वगोधूमः । यथा,—
"संयावस्तु घृतक्षीरगुड़गोधूमपाकजः ।"
इति शब्दचन्द्रिका ॥
पिष्टकविशेषः । पेराकी इति भाषा । यथा,—
"पर्य्यस्यः साज्यसमिता निर्म्मिता घृतभर्ज्जिताः
कुट्टिताश्चालिताः शुद्धाः शर्कराभिर्व्विमर्द्दिताः ॥
तच्चूर्णे प्रक्षिपेदेलां लवङ्गमरिचानि च ।
नालिकेलं सकर्पूरं वारबीजान्यनेकशः ॥
घृताक्तसमितापुष्टरोटिका रचिता ततः ।
तस्यां तत्पुरणात्तस्य कुर्य्यान्मुद्रां दृढ़ां सुधीः ॥
सर्पिषि प्रचुरे तान्तु सुपचेन्निपुणो जनः ।
प्रकारज्ञैः प्रकारोऽयं संयाव इति कीर्त्तितः ।
मण्ठकोऽपि समो ज्ञेयः संयावोऽपि गुणैर्जनैः ॥"
इति भावप्रकाशः ॥

संयुक् [ज्] त्रि, ( सं+युज्+क्विप् । ) गुणवान् । यथा,—
"सम्बन्धौ गुणवान् संयुक् मित्रयुङ्मित्रवत्सलः ।"
इति त्रिकाण्डशेषः ।